विरौति गान्धारं क्रौञ्चो नदति मध्यमम्। पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्। अश्वश्च धैवतं रौति निषादं रौति कुञ्जरः" इति। "अश्वस्तु धैवतं सोऽपि मत्तः पञ्चमसंज्ञकम्। निषादन्तु गजो गर्जत्युन्मदोऽसौ सपञ्चमम्" इति। भरतोऽप्याह "षड्जञ्च पञ्चमञ्चेति मयूरो नदति द्विधा। अश्वाद्या धैवतादींश्च प्राहुर्मत्ताश्च पञ्चमम्" इति। निषादादिशब्दनिरुक्तिश्च "निषीदन्ति स्वरा यस्मिन्निषादस्तेन हेतुना। अशेषसन्धिविषयं स हि व्याप्यावतिष्ठते"। "वायुः समुद्गतो नाभेः कण्ठशीर्षसमुद्गतः। नदत्यृषभवद् यस्मात्तेनैष ऋषभः स्मृतः" "वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना। "नासां कण्ठमुरस्तालुजिह्वां दन्तांश्च संश्रितः। षड्भ्यः सञ्जायते यस्मात्तस्मात् षड्ज इति स्मृतः"। "तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः। नाभिप्राप्तो महानादो मध्यमस्तेन स स्मृतः"। "अभिसन्धयते यस्मात् स्वरांस्तेनैष धैवतः। स तु तावत् प्रधानत्वात् ललाटे व्यवतिष्ठते। "वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्द्धसु। विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते"। "स स्वरो यः श्रुतिस्थाने स्वरन् हृदयरञ्जकः। षड्ज ऋषभगान्धारा मध्यमः पञ्चमस्तथा। धैवतश्च निषादश्च स्वराः सप्त प्रकीर्त्तिताः" भरतः।

बालादिस्वराश्च चक्रशब्दे २८११ पृ० दृश्याः।

**स्वरघ्न** पु० स्वरं हन्ति हन-क। गलरोगभेदे "अष्टादशगलरोगोपक्रमे" "यस्ताम्यमानः श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकण्ठः। कफोपदुष्टेष्वनिलायनेषु ज्ञेयः स रोगः श्वसनात् स्वरघ्नः"। ताम्यमानः तमः पश्यन् शुष्को विमुक्तोऽस्वाधीनकण्ठो यस्य सः अस्वाधीनता भक्तं गिलितुमशक्यत्वात् अनिलायनेषु वातवर्त्मसु श्वसनाद्वातात्" भावप्र०

**स्वरचक्र** न० स्वरोदयोक्ते चक्रभेदे चक्रशब्दे २८१०पृ० दृश्यम्।

**स्वरपत्तन** न० स्वराणां निषादादीनां गानध्वनिविशेषाणां पत्तनमाश्रयः। सामवेदे त्रिका०।

**स्वरभङ्ग** पु० स्वरस्य कण्ठध्वनिभेदस्य भङ्गो यस्मात्। रोगभेदे स्वरभेदोऽप्यत्र तल्लक्षणादि सुश्रु० उक्तं यथा "अथातः स्वरभेदप्रतिषेधमध्यायं व्याख्यास्यामः। अत्युच्चभाषणविषाध्ययनाभिघातशीतादिभिः प्रकुपिताः पवनादयस्तु। ते शब्दवाहिधमनीषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि षड्विधः सः। वातेन कृष्णनयनाननमूत्रवर्चा भिन्नं शनैर्वदति गर्दभवत्स्वरञ्च। पित्तेन पीतवदनाक्षिपुरीषमूत्रो ब्रूयाद्गलेन च विदाहसमन्वितेन। श्लेष्मात्मकेन सततं कफरुद्धकण्ठो मन्दं शनैर्वदति वापि दिवा विशेषात्। सर्वात्मके भवति सर्वविकारसम्पद्व्यक्तता च वचसस्तमसाध्यमाहुः। धूप्येत वाक्क्षयकृते क्षयमाप्नुयाच्च वागेष वापि हतवाक् परिवर्जनीयः। अन्तर्गतस्वरमलक्ष्यपदं चिरेण मेदोऽन्वयाद्वदति दिग्धगलोष्ठतालुः। क्षीणस्य वृद्धस्य कृशस्य चापि चिरोत्थितो यश्च सहोपजातः। मेदस्विनः सर्वसमुद्भवश्च स्वरामयो यो न स सिद्धिमेति। स्निग्धान् स्वरातुरनरानपकृष्टदोषान् संयोजयेद्वमनरेचनवस्तिभिश्च। नस्यावपीडमुखधावनधूमलेहैः सम्पादयेच्च विविधैः कवलग्रहैश्च"।

**स्वरमण्डलिका** स्वराणां मण्डलमस्त्यस्य ठन्। वीणायाम् हेम०। २स्वरसमूहे।

**स्वरलासिका** स्त्री स्वरैः निषादादिभिः लसति नृत्यतीव लस-ण्वुल्। १वीणायां २वंशयाञ्च शब्दर०।

**स्वरस** पु० स्वेन स्वभावेन रसः आस्वाद्यः। १शिलापिष्टकल्कभेदे शब्दर० २क्वाथभेदे च। "सद्यः कुशादार्द्रद्रव्यात् क्षुण्णाद्यन्त्रादिपीडनात्। यो रसस्त्वभिनिर्याति स्वरसः स प्रकीर्त्तितः" वैद्यक०। स्वस्य रसः रागः। ३स्वाभिप्राये ३स्वतात्पर्य्ये ४वाक्यादौ रचनाभङ्गीभेदे च।

**स्वरसन्धि** पु० स्वरनिमित्तकः सन्धिः। व्याकरणोक्ते स्वरनिमित्तके दीर्घादौ कार्य्ये। [शब्दे २५६४ पृ० दृश्यम्।

**स्वरसामन्** पु० गवामयनयज्ञीयषष्ठमासीयदिनभेदे गवामयन-

**स्वरा** स्त्री ब्रह्मणः प्रथमपत्न्यां पद्मपु०।

**स्वरापगा** स्त्री स्वः स्वर्गस्यापगा। गङ्गायाम् हेमच०। स्वर्गापगादयोऽप्यत्र।

**स्वरालु** पु० स्वराय अलति पर्याप्नोति अल-उण्। वचायां शब्दच०। तत्सेवने हि स्वरस्योत्तेजनात्तस्यास्तथात्वम्।

**स्वराज्** पु० स्वेनैव राजते राज-क्विप्। ईश्वरे "अर्थेष्वभिज्ञः स्वराडिति" भागवतम् १।१।१।

**स्वरित** पु० स्वरो जातोऽस्य इतच्। १जातस्वरे २उदात्तानुदात्तसमाहाररूपे स्वरभेदे पा०

"उच्चैरुदात्तः" "नीचैरनुदात्तः"। "समाहारः स्वरितः" पा० "उदात्तानुदात्तत्वे वर्णधर्मौ समाश्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्" सि०कौ०। "तस्यादित उदात्तमर्द्धह्रस्वम्" पा० "ह्रस्वग्रहणमतन्त्रम् स्वरितस्यादितोऽर्द्धमुदात्तम्बोध्यम् उत्तरार्द्धन्तु परिशेषादनुदात्तम्। तस्य